B.N.M.U. Madhepura
M.H.M. College Sonbarsa
Sanskrit (HONS), B.A.-I
Session – 2019 – 2020

Date- 10 April 2020
Dr. Upendra Pandit
Dept of Sanskrit

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

अन्वय → तस्मिन् अद्रौ अबलाविप्रयुक्तः, कनकवलय-भ्रंशरिक्तप्रकोष्ठः कामी स कतिचित् मासान् नीत्वा आषाढस्य प्रथम दिवसे आश्लिष्टसानुम् वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं ददर्श।

हिन्दी में अनुवाद :- उस रामगिरि पर्वत पर पत्नी से वियुक्त सोने के कड़े के गिर जाने से सुनी कलई वाले एवं कामुक उस यक्ष ने कुछ महीने बिताकर आषाढ़ मास के प्रथम दिन में पर्वत शिखर से सटे हुए वप्रक्रीड़ा करते हुए (मिट्टी की टीले को उखाड़ने का खेल करते हुए दिखने वाले) या मिट्टी में तिरछे दाँतों से प्रहार करने वाले हाथी के समान काले-काले मेघों को देखा।

P.T.O.

संस्कृत व्याख्या - श्लोकोऽयं महाकविकालि-दासप्रणीतस्य "मेघदूतम्" समाख्यस्य गीति-काव्यस्यात्मकस्य खण्डकाव्यस्य पूर्वभागे विलसति। महाकविकालिदासः संस्कृतसाहित्य-स्य सर्वाधिकः प्रतिष्ठितः कविः वर्तते। तस्य प्रसादगुणसम्पन्ना रचनामाधुरी वैदर्भी शैली च विशिष्टा वर्तते। उपमार्थान्तरन्यासविन्यासे तस्य महती प्रसिद्धीः दृश्यते।

राजराजेन अलकातो निर्वासितः कश्चिद् यक्षः स्ववर्षावधि शापकालं यापयितुं रामगिर्याश्रमेषु निवसति। आषा-ढस्य प्रथम दिवसे आश्लिष्टसानुं मेघं दृष्ट्वा विरहपीडितः सन् स्वम् विरहपीडि-तायै स्वप्रियतमायै संवादं प्रापयितुम् मेघं सम्बोधयन् सः अलकागमनमार्गं निर्दिश्य यक्षः एतादृशं कथयति ....

P.T.O.

तस्मिन् पूर्वोक्ते रामगिरिनामके अद्रौ पर्वते अबलाविप्रयुक्तः कनकवलयभ्रंशरिक्त प्रकोष्ठः स्वर्णकङ्कणपातशून्यमणिबन्धः कामी कामुकः स यक्षः कतिचित् कतिपयान् मासान् नीत्वा यापयित्वा आषाढस्य एतन्नामकस्य मासस्य प्रथमदिवसे प्रथमदिने आश्लिष्ट-सानु आक्रान्तकूटम् वप्रक्रीडापरिणत गज प्रेक्षणीयम् उत्खातकोलीतिर्यग्दन्त प्रहारघस्ति दर्शनीयम् मेघं जलधरं ददर्शवान् ।

व्याकरण –

विप्रयुक्त = वि + प्र + युज + क्त

कामी = काम + इनि

नीत्वा = नी + क्त्वा

आश्लिष्ट = आ + श्लिष् + क्त

प्रेक्षणीयम् = प्र + ईक्ष् + अनीयर्

छन्द – "मन्दाक्रान्ता" लक्षणमस्ति यत्

मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरु चेत्

अलंकार – "उपमा"